इति तिथ्यादितत्त्वम् ॥ * ॥ न्यायग्रन्थविशेषः । तस्य द्वितीयश्लोको यथा,—
"द्रव्यं नाकुलमुज्ज्वलो गुणगणः कर्म्माधिकं श्लाघ्यते
जातिर्व्विश्रुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः ।
सम्बन्धः सहजो गुणादिभिरयं यत्रास्तु सत्प्रीतये
सान्वीक्षा नयवेश्मकर्म्मकुशला श्रीन्यायलीलावती ॥"
इति मखनमिश्रः ॥

लीलोद्यानं, क्ली, ( लीलार्थमुद्यानम् । ) देववनम् । इति त्रिकाण्डशेषः ॥ ( यथा, कथासरित्सागरे । १०६ । ४१ ।
"अथ मानसमुल्लङ्घ्य देवर्षिव्रातसेवितम् ।
अतीत्य गण्डशैलञ्च लीलोद्यानं द्युयोषिताम् ॥")

लुक्, [ च् ] पुं, लोपः । यथा । स्वमोर्लुक् क्लीवात् परयोः स्वमोर्लुक् स्यात् । इति मुग्धबोधव्याकरणम् ॥

लुक्कायितः, त्रि, ( लुक् कायस्य यस्य तादृश इवाचरतीति । लुक्काय + क्विप् । ततः क्तः । ) अन्तर्हितः । यथा । अन्तर्धानं लुक्कायनमिति यावत् । यथा गुरोरन्तर्द्धत्ते शिशुः निलीयते पलायते लुक्कायते लुक्कायतीति लुक्शापनयनेऽपि लुक् । लुक् कायः शरीरं यस्य स लुक्कायः ततः स इव आचरतीति क्वौ साध्यम् । इति कारकटीकायां दुर्गादासः ॥ कर्म्मणि क्तप्रत्ययेन निष्पन्नोऽयम् ॥

लुञ्जुषः, पुं, कोलङ्गः । इति रत्नमाला ॥

लुज, इ क भाषार्थे । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सक०-च-सेट् । ) इ क, लुञ्जयति । भा दीप्तिः । षष्ठार्था निकेतनहिंसाबलदानानि । इति दुर्गादासः ॥

लुञ्च, अपनयने । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) सोऽलुञ्चीत् कर्णनासिकम् । इति दुर्गादासः ॥

लुट, विलोटविलोडनयोः । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-विलोटे अक०-विलोडने सक०-सेट् । ) लोटति । इति दुर्गादासः ॥

लुट, इ द्युतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् ।) इ, लुण्टति । द्युतिश्चौर्य्यम् । इति दुर्गादासः ॥

लुट, ल ऋ य विलोटविलोडनयोः । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-विलोटे अक०-विलोडने सक०-सेट् । ) ल, अलुटत् । ऋ, अलूलुटत् अलुलोटत् । य, लुट्यति । विलोटः सम्बन्धीभावः । तत्र लुट्यन् शशाङ्को भुवि रौहदावान् । इति भट्टिः ॥ विलोडने लुट्यत्यट्टालकान् दुर्गान् कवाटानि च लोटति । इति हलायुधः । इति दुर्गादासः ॥

लुट, ल ङ दीप्तिप्रतिहत्योः । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-पुनर्हनने सक०-सेट् । ) ल, अलुटत् । ङ, लोटते । प्रतिहतिः शोकादिना पतनं पुनर्हननं वा । इति दुर्गादासः ॥

लुट, क भासे । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सेट् । ) क, लोटयति । भासो दीप्तिः । इति दुर्गादासः ॥

लुठ, उपघाते । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) लोठति । इति दुर्गादासः ॥

लुठ, इ गत्यालस्यस्तेयखोटे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक० च-सेट् ।) इ, लुण्ठति । आलस्यं मन्दीभावः । स्तेयं चौर्य्यम् । खोटः खोड़नम् । इति दुर्गादासः ॥

लुठ, ल ङ प्रतीघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ल, अलुठत् । ङ, लोठते । इति दुर्गादासः ॥

लुठ, क चौर्य्ये । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) क, लोठयति । इति दुर्गादासः ॥

लुठ, श लोटे । इति कविकल्पद्रुमः ॥ ( तुदा०-पर०-अक०-सेट् । ) श, लुठति अलुठीत् लुलोठ । लोटः सम्बन्धीभावः । हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले । इति दुर्गादासः ॥

लुठनं, क्ली, ( लुठ लोटे + ल्युट् । ) अश्वस्य भूमौ पुनः पुनः श्रमोपहननम् । लोटा इति गड़ागड़ि इति च भाषा । तत्पर्य्यायः । वेल्लनम् २ । इति त्रिकाण्डशेषः ॥

लुठितः त्रि, ( लुठ + क्तः । ) मुहुर्भुवि परावृत्तः । श्रमशान्त्यर्थं पुनःपुनर्भूमौ लुठितोऽश्वः । तत्पर्य्यायः । उपावृत्तः २ । इत्यमरभरतौ ॥ वेल्लितः ३ । इति शब्दरत्नावली ॥ अपावृत्तः ४ परावृत्तः ५ । इति हेमचन्द्रः ॥ ( यथा, कथासरित्सागरे । १०२ । ७७ ।
"शिलाकलापो लुठितः किमञ्जनगिरेरयम् ।
किमुताकालकल्पान्तमेघौघः पतितो भुवि ॥")

लुड, मन्थे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) लोडति । मन्थो विलोडनम् । इति दुर्गादासः ॥

लुड, श संवृतौ । क्षेपे । इति कविकल्पद्रुमः ॥ ( तुदा०-पर०-सक०-सेट् । ) श, लुडति अलुडीत् लुलोड । इति दुर्गादासः ॥

लुण्ट, कि अवज्ञाचौर्य्ये । इति कविकल्पद्रुमः ॥ ( चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् । ) दन्त्यनकारप्रकृतिः टयोगान्मूर्द्धन्यः तेन भ्वादिपक्षे यगादौ नलोपे लुट्यत इत्यादि । कि, लुण्टयति लुण्टति । इति दुर्गादासः ॥

लुण्टकः पुं, ( लुण्टतीति । लुण्ट + ण्वुल् । ) शाकविशेषः । नल्या इति भाषा । तत्पर्य्यायः । मासवः २ । इति शब्दचन्द्रिका ॥

लुण्टा, स्त्री, ( लुण्ट + अङ् । टाप् । ) लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्टाकः, पुं, ( लुण्टतीति । लुण्ट + "जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।" ३ । २ । १५५ । इति षाकन् । ) चौरः । लुटधातोः षाकप्रत्ययेन निष्पन्नः ॥

लुण्टाकी, स्त्री, (लुण्टाक + षित्वात् ङीष् ।) चौरा स्त्री । इति मुग्धबोधव्याकरणम् ॥

लुण्ठकः, त्रि, ( लुण्ठतीति । लुण्ठ + ण्वुल् । ) स्तेयकारकः । लुटेरा इति भाषा । यथा,—
"ये चौरा वह्निना दुष्टा गरदा ग्रामलुण्ठकाः ।
सारमेयादने ते वै पात्यन्ते पातकान्विताः ॥"
इति पाद्मे पातालखण्डम् ॥

लुण्ठनं, क्ली, ( लुण्ठ + ल्युट् । ) लुठनम् । इति काचित् शब्दरत्नावली ॥ ( यथा, देवीभागवते । ५ । १ । १८ ।
"हरणं लुण्ठनं तद्वत् तत्पत्नीनां नराधिप ! ॥")

लुण्ठा, स्त्री, ( लुण्ठ + अङ् । स्त्रियां टाप् । ) लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्ठाकः, पुं, ( लुण्ठ + षाकन् । ) काकः । इति त्रिकाण्डशेषः ॥ (चौरः । यथा, कलाविलासे । १ । ३ ।
"विप्रोऽभिसारिकाणां भवनगणस्फाटिकप्रभानिकरः ।
यत्र विराजति रजनीतिमिरपटप्रकटलुण्ठाकः ॥")

लुण्ठी, स्त्री, लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्ड, क चौर्य्ये । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) क, लुण्डयति । इति दुर्गादासः ॥

लुण्डिका, स्त्री, ( लुण्डी । स्वार्थे कन् । ततष्टाप् । ) न्यायसारिणी । इति हारावली ॥ एकत्र वेष्टितमेषलोमादिः । लुड़ि इति नुटि इति च भाषा ॥ यथा,—
"सैन्धवञ्च घृताभ्यक्तं ताम्रभाजनमातपे ।
प्रतप्तमूर्णया घृष्टं तन्मलञ्च समाहरेत् ॥"
ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेषलोमलुण्डिकया घृष्ट्वा मलग्रहं कृत्वा तेन स्रावयेत् । इति भैषज्यरत्नावली ॥

लुण्डी, स्त्री, न्यायसारिणी । इति त्रिकाण्डशेषः ॥

लुथ, इ कुन्थे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर० सक०-सेट् । ) इ, लुन्थति । कुन्थो वधक्लेशौ । इति दुर्गादासः ॥

लुप, ऋ श प ल ञ औ छेदे । इति कविकल्पद्रुमः ॥ ( तुदा०-उभ०-सक०-अनिट् । ) ऋ, अलूलुपत् अलुलोपत् । श प ञ, लुम्पति लुम्पते । ल, अलुपत् । औ, लोप्ता । इति ...दासः ॥

लुप, इर य युपि । इति कविकल्पद्रुमः ॥ ( दिवा०-पर०-अक०-सेट् । ) इर, अलुपत् अलोपीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । य, लुप्यति । युपि व्याकुलीभावे । पातु लुप्यति लावण्यं नेत्राञ्जलिपुटैर्नरः । इति हलायुधः । इति दुर्गादासः ॥

लुप्, पुं, ( लुप् छेदे + क्विप् । ) लोपः । यथा । अभोभगोऽघोऽध्योऽवे लुप् । इति मुग्धबोधव्याकरणम् ॥